रक्ताधिष्ठानजान् प्रायो विकारान् जनयन्ति ते ॥
माषपिष्टान्नलवणगुड़शाकैः पुरीषजाः ।
मांसमाषगुड़क्षीरदधिशुक्तैः कफोद्भवाः ॥
विरुद्धा जीर्णशाकाद्यैः शोणितोत्था भवन्ति हि ॥
ज्वरो विवर्णताशूलं हृद्रोगः सदनं भ्रमः ॥
भक्तद्वेषोऽतिसारश्च सञ्जातकृमिलक्षणम् ।
दृश्यास्त्रयोदशाद्यास्तु कृमीणां परिकीर्त्तिताः ॥
केशादाद्यास्त्वदृश्यास्ते द्वावाद्यौ परिवर्ज्जयेत् ।
एषामन्यतमं ज्ञात्वा जिघांसुः स्निग्धमातुरम् ॥
सुरसादिविपक्वेन सर्पिषा वान्तमादितः ।
विरेचयेत्तीक्ष्णतरैर्योगैरास्थापयेच्च तम् ॥
यवकोलकुलत्थानां सुरसादेर्गणस्य च ।
विड़ङ्गस्नेहयुक्तेन क्वाथेन लवणेन च ॥
प्रत्यागते निरूहे तु नरं स्नातं सुखाम्बुना ।
युक्तशात् कृमिघ्नैरशनैस्ततः शीघ्रं भिषग्वरः ॥
स्नेहेनोक्तेन चैनन्तु योजयेत् स्नेहवस्तिना ।
ततः शिरीषकिण्विही-रसं क्षौद्रयुतं पिबेत् ।
केमूकस्वरसं वापि पूर्व्ववत्तीक्ष्णभोजनः ॥
पलाशवीजस्वरसं कल्कं वा तण्डुलाम्बुना ।
पारिभद्रकपत्राणां क्षौद्रेण स्वरसं पिबेत् ॥
पत्तूरस्वरसं वापि पिबेद्वा सुरसादिजम् ।
लिह्यादश्वशकृच्चूर्णं विड़ङ्गं वा समाक्षिकम् ॥
पत्रैर्मूषिकपर्ण्या वा सुपिष्टैः पिष्टमिश्रितैः ।
खादेत् पूपालिकान् पक्वान् धान्याम्लञ्च पिबेदनु ॥
सुरसादिगणे तैलं पक्वं वा पानमिष्यते ।
विड़ङ्गचूर्ण-पिष्टाभ्यां तस्मिन् भक्ष्यन्तु कारयेत् ॥
तत्कषायप्रपीतानां तिलानां स्नेहमेव वा ।
श्वाविधः शल्लकचूर्णं सप्तकृत्वः सुभावितम् ॥
विड़ङ्गानां कषायेण त्रैफलेन तथैव च ॥
क्षौद्रेण लिह्यानुपिबेद्रसमामलकोद्भवम् ।
स्वक्षाभया रसश्चापि विधिरेषोऽयसामपि ॥
पूतीकस्वरसं वापि पिबेद्वा मधुना सह ।
पिबेद्वा पिप्पलीमूलमजामूत्रेण संयुतम् ॥
सप्तरात्रं पिबेद्दृष्टप्लवपुवा दधिमस्तुना ।
पुरीषजान् कफोत्थांश्च हन्यादेव कृमीन् भिषक् ॥
शिरोहृद्घ्राणवक्त्राक्षि संस्थांश्च पृथग्विधान् ।
विशेषेणाञ्जनैर्नस्यैरवपीड़ैश्च साधयेत् ॥
शक्रसन्तरकस्य सम्युक्तं भावयेदति । ।
निःक्वाथेन विड़ङ्गानां चूर्णं प्रधमनन्तु तत् ॥
अयश्चूर्णान्यनेनैव विधिना योजयेद्भिषक् ।
सकांस्यनीलं तैलञ्च नस्यं स्यात् सुरसादिके ॥
इन्द्रलुप्तविधिश्चापि विधेयो रोमभोजिषु ।
दन्तादानां समुद्दिष्टं विधानं मुखरोगिकम् ॥
रक्तजानां समुद्दिष्टं कुर्य्यात् कुष्ठचिकित्सिते ।
सुरसादिन्तु सर्व्वेषु सर्व्वथैवोपयोजयेत् ॥
प्रयुक्ततिक्तकटुकं भोजनञ्च हितं भवेत् ।
कुलत्थक्वाथसंसृष्टं क्षीरपानञ्च पूजितम् ॥ * ॥

क्षीराणि मांसानि घृतानि चैव
दधीनि शाकानि च पर्व्ववन्ति ।
समासतोऽम्लान् मधुरान् हिमांश्च
कृमीन् जिघांसुः परिवर्ज्जयेत्तु” ॥

इति सुश्रुत उत्तरतन्त्रे चतुःपञ्चाशत्तमोऽध्यायः ॥)

कृमिकण्टकं, क्ली, (कृमेः कृमिरोगस्य रोगे वा कण्टकमिव । तन्नाशकतया तथात्वम् ।) विड़ङ्गम् । चित्राङ्गः । उडुम्बरः । इति मेदिनी ॥

कृमिकोषोत्थं, त्रि, (कृमेः कृमिभिर्निर्म्मितो वा कोषः । शाकपार्थिववत् मध्यपदलोपः । तस्मात् उत्तिष्ठति उत्पद्यते । उत् + स्था + कः ।) कौषेयम् । इत्यमरः । २ । ६ । १११ । रेसमिकापड़ इति भाषा ॥

कृमिघ्नः, पुं, (कृमिं हन्ति इति । हन् + टक् । “हन्तेरत् पूर्व्वस्य” । ८ । ४ । २२ । इति नियमात् न णत्वम् ।) विड़ङ्गः । इत्यमरः । २ । ४ । १०६ ॥ पलाण्डुः । कोलकन्दः । पारिभद्रः । भल्लातकः । इति राजनिर्घण्टः ॥ (विड़ङ्गहरिद्रा च ।
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥)

कृमिघ्ना, स्त्री, (कृमिघ्न + अजादित्वात् टाप् ।) हरिद्रा । इति भावप्रकाशः ॥

कृमिघ्नी, स्त्री, (कृमिघ्न + टित्वात् ङीप् ।) धूमपत्रा । विड़ङ्गः । इति राजनिर्घण्टः ॥

कृमिजं, क्ली, (कृमिभ्यो जायते इति । अन्येभ्योपीति डः ।) अगुरु ॥ इत्यमरः । २ । ६ । १२६ ॥ (कृमिजातमात्रे, त्रि । यथा, पञ्चतन्त्रे । १ । १०३ ।
“कौषेयं कृमिजं सुवर्णमुपलाद्दूर्व्वापि गोरोमतः ।
पङ्कात्तामरसं शशाङ्क उदधेरिन्दीवरं गोमयात्” ॥
अस्य पर्य्याया यथा ।
“अगुरु प्रवरं लोहं राजार्हं योगजन्तथा ।
वंशिकं कृमिजं वापि कृमिजग्धमनार्य्यकम्” ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
गुणाश्चास्यागुरुशब्दे ज्ञातव्याः ॥)

कृमिजग्धं, क्ली, (कृमिभिर्जग्धं भुक्तम् । उपचारात् तज्जनिततया तथात्वम् ।) अगुरु । इति राजनिर्घण्टः ॥ (“कृमिजग्धमनार्य्यकम्” ।
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

कृमिजा, स्त्री, (कृमिभ्यो जायते या । जन + डः टाप् च । लाक्षा ।) इति राजनिर्घण्टः ॥
(अस्य पर्य्याया यथा,—
“कीटजा कृमिजा लाक्षा जतुका च गवाधिका” ॥
इति वैद्यकरत्नमालायाम् ॥)

कृमिरिपुः, पुं, (कृमीणां रिपुर्नाशकः । तन्नाशकत्वात् तथात्वम् ।) विड़ङ्गः । इति शब्दरत्नावली ॥
(विड़ङ्गशब्देऽस्य विशेषो ज्ञेयः ॥)

कृमिला, स्त्री, (कृमीन् कृमिवत् सन्तानान् लाति आदत्ते । ला + कः टाप् च ।) बहुप्रसूः । बहुसन्तानप्रसवा । इति हेमचन्द्रः ॥ कृमियुक्ते त्रि ॥

कृमिवृक्षः, पुं, (कृमिप्रधानः कृमिमयो वा वृक्षः ।) कोषाम्रः ।-इति भावप्रकाशः ॥
(कोषाम्रशब्दे ऽस्य विवृतिर्ज्ञातव्या ॥)

कृमिशङ्खः, पुं, (कृमिरिव जीवन् शङ्खः ।) जीवशङ्खः । तत्पर्य्यायः । कृमिजलजः २ कृमिवारिरुहः ३ जन्तुकम्बुः ४ । अस्य गुणाः । रसवीर्य्यादौ शङ्खसदृशत्वम् । इति राजनिर्घण्टः ॥

कृमिशुक्तिः, स्त्री, (कृमिरिव शुक्तिः ।) जलशुक्तिः । इति राजनिर्घण्टः ॥

कृमिशैलकः, पुं, (कृमिनिर्म्मितः शैल इव । ततः स्वार्थे कन् ।) वल्मीकः । इति शब्दरत्नावली ॥

कृमीलकः, पुं, (कृमीन् ईरयति जनयतीति । ईर् + ण्वुल् । रस्य लत्वम् ।) वनमुद्गः । इति राजनिर्घण्टः ॥

कृव, इ न कृतौ । हिंसे । इति कविकल्पद्रुमः ॥ (स्वां-परं-सकं-सेट् । इदित् ।) कृन्वी । न, कृणोति । इ, कर्म्मणि कृण्व्यते । इति दुर्गादासः ॥

कृविः, पुं, (क्रियते वस्त्रादिकमनेन । डु कृञ् करणे “कृविघृष्विच्छविस्थविकिकीदिवि” । उणां ४ । ५६ । इति क्विन् निपातनात् ।) वायदण्डम् । इति उणादिवृत्तिः । ताँत इति भाषा ॥

कृश, इर् य कार्श्ये । इति कविकल्पद्रुमः ॥ (दिवां-परं-सकं-सेट् । इरित् ।) कार्श्यं कृशकरणम् । इर्, अकृशत् अकर्शीत् । अस्मात् पुषादित्वान्नित्यं ङ इत्यन्ये । य, कृश्यति चन्द्रः कृष्णपक्षः । इति दुर्गादासः ॥

कृशः, त्रि, (कृशधातोः क्तप्रत्यये “अनुपसर्गात् फुल्लक्षीवेति” । ८ । २ । ५५ । निपातनात् साधुः ।) अल्पः । (यथा, मनौ । ४ । १८४ ।
“आकाशेशास्तु विज्ञेया बालवृद्धकृशातुराः” ॥)
सूक्ष्मः । इत्यमरः । ३ । १ । ६१ ॥
(यथा, आर्य्यासप्तशती । ४९५ ।
“राजसि कृशाङ्गि ! मङ्गलकलसी सहकारपल्लवेनेव । तेनैव चुम्बितमुखी प्रथमाविर्भूतरागेण” ॥
“ व्यायाममतिसौहित्यं क्षुत्पिपासामयौषधम् ।
कृशो न सहते तद्वदतिशीतोष्णमैथुनम् ॥
प्लीहा कासः क्षयः श्वासो गुल्मार्शांस्युदराणि च ।
कृशं प्रायोऽभिधावन्ति, रोगाश्च ग्रहणीमताः” ॥
“सततं व्याधितावेतावतिस्थूलकृशौ नरौ ।
सततञ्चोपचर्य्यौ हि कर्षणैर्वृंहणैरपि” ॥
“स्थौल्यकार्श्ये वरं कार्श्यं समोपकरणौ हितौ ।
यद्युभौ व्याधिरागच्छेत् स्थूलमेवाति पीड़येत्” ॥
इति चरके सूत्रस्थाने २१ अध्याये ॥
“कश्चिदन्यः कृशोऽतीव बलवान् दृश्यते नरः” ॥
तत्र हेतुमाह ।
“आधानसमये यस्य शुक्रभागोऽधिको भवेत् ।
मेदोभागस्तु हीनः स्यात् स कृशोऽपि महाबलः” ॥
यस्याधानसमये जनयितुः शुक्रस्याधिक्यं भवति ।
मेदसोऽल्पता तस्य कृशस्यापि बहु बलमित्यर्थः ॥
अथ कार्श्यस्य चिकित्सा ।
“क्षुद्रान्नादि निमित्ते तु कृशे युञ्जीत भेषजम् ।
वृंहणं बलकृद्दृष्यं तथा वाजीकरञ्च यत् ॥

पीताश्वगन्धा पयसार्द्धमासं
घृतेन तैलेन सुखाम्बुना वा ।
कृशस्य पुष्टिं वपुषो विधत्ते
बालस्य शस्यस्य यथाम्बुवृष्टी ॥

अश्वगन्धस्य कल्केन क्वाथे तस्मिन् पयस्यपि ।
सिद्धं तैलं कृशाङ्गानामभ्यङ्गादङ्गपुष्टिदम्” ॥
इति अश्वगन्धातैलम् ॥ * ॥
इति भावप्रकाशस्य मध्यखण्डे तृतीयभागे कार्श्याधिकारे ॥) (अक्षमः । यथा, मनौ । ७ । १९५ ।